इति देव्याः कवचं सम्पूर्णम् ।
iti devyāḥ kavacaṃ sampūrṇam

Atha Devyāḥ Kavacam
(The Armour of the Goddess)

Oṃ. Of the armour of the goddess, Brahmā is the Ṛṣi (Sage), Anuṣṭup (32 syllables to the verse) is the meter (Chanda), the presiding Deity is Cāmuṇḍā; the main Seed is "Aṅganyāsoktamātaraḥ" (the touching of limbs of the body with the names of mother-goddess), the element is Digbandhadevatā (that which binds the gods of all the directions); to be recited as a part of Saptaśatī, to please Jagadambā, the mother of the universe.

"Oṃ" Obeisance to Caṇḍikā.

Mārkaṇḍeya said:
O Grandfather! Tell me that which is the supreme secret in the world, giving every kind of protection to humankind and has not been disclosed to anybody else. || 1 ||

Brahmā said (to the sage Mārkaṇḍeya):
O wise one, there is one such sacred and most hidden secret armour hymn (Kavaca) of the Goddess which is beneficial to all beings. Please listen to it, O great sage. || 2 ||

The first form is Śailaputrī - (the daughter of the mountains); second is Brahmacāriṇī (one who practices devout austerity); third is Candraghaṇṭā - (one who possesses a bell like half-circular moon on her forehead) fourth is Kūṣmāṇḍā - (whose void contains the Universe); fifth is Skandamātā - (the mother of Skanda (Lord Kārtikeya)); sixth is Kātyāyanī (who incarnated to help the Devas); seventh is Kālarātri - (the one who destroys ignorance and removes darkness); eight is Mahāgaurī - (the one who is extremely fair) and the ninth is Siddhidātrī - (the bestower of mystical accomplishments), these are proclaimed as the nine Durgās. These are nine names which were declared by the noble Brahmā. || 3 - 5 ||

While being consumed in the fire or having been surrounded by the enemies on the battlefield, when seized by fear in adversity or crisis, nothing inauspicious will happen to them in battle or adversity who takes refuge in the goddess. I do not behold misfortune for such a person, neither grief, nor sorrow, nor fear. ||6-7||

Those who remember her always with devotion will assuredly get prosperity. O supreme goddess, those who remember you, you protect them; there is no doubt about it. ||8||

The Goddess Cāmuṇḍā is seated on a corpse, Vārāhī mounted on a buffalo, Aindrī is seated on an elephant and Vaiṣṇavī on a Garuḍa. || 9 ||

Māheśvarī is riding on a bull; the vehicle of Kaumārī is the peacock, Lakṣmī, the goddess beloved of Viṣṇu, is seated upon a lotus and is also holding a lotus in Her Hand. || 10 ||

The Goddess Īśvarī, who is on the bull, has assumed white complexion. Brāhmī, adorned with all her ornaments, is seated firmly on a swan. ||11||

All the mothers are endowed with all types of Yoga and are adorned with different ornaments and various gems. ||12||

All the Goddesses, trembling in anger, are seen mounted in chariots and bearing conch, discus, mace, missile, plough, club, javelin, axe, noose, barbed dart, trident and the excellent weapon of bow to destroy the demons bodies, to dispel the devotee's fears, and for the well-being of the gods. ||13-15||

Salutations to you, O great fierce one, O great one of dreadful prowess, O one of tremendous strength, O one of great energy, O the destroyer of the worst fears, protect me, O goddess who is difficult to be looked at and who increases the fear of enemies. May Goddess Aindrī protect me in the east, Agnidevatā (the Goddess of Fire) in the south-east, Vārāhī (Śakti (energy) of Viṣṇu in the form of the boar) in the south, Khaḍgadhāriṇī (wielder of the sword) in the south-west, Vāruṇī (the Śakti of Varuṇa, the rain God) in the west and Mṛgavāhinī, (whose vehicle is the deer) may protect me in the north-west. ||16-18||

The Goddess Kaumārī (the Śakti (energy) of Kumāra) protect me in the north and Goddess Śūladhāriṇī in the north-east, Brahmāṇi, (the Śakti of Brahmā) guard me above and Vaiṣṇavī (Śakti of Viṣṇu) below. ||19||

May Goddess Cāmuṇḍā, who sits on a corps, protect me from all the ten directions. May Goddess Jayā protect me from the front and Vijayā from the rear; Ajitā on the left side and Aparājitā on the right side. May Goddess Udyotinī guard my topknot (tuft of hair) and Umā may manage the upper head. ||20-21||

May Mālādhārī (the one who wears the garland) protect the forehead, Yaśasvinī (the bearer of welfare) - the pair of eye-brows, Trinetrā (the three eyed one) - the place between the eyebrows, Yamaghaṇṭā - the nose, Śaṃkhinī - between the eyes, Dvāravāsinī (the dweller at the doors) - the ears, Kālikā (the goddess of time) - the cheeks and Śāṃkarī -the roots of the ears. ||22-23||

May Sugandhā (excellent scent) protect my nose, Carcikā - upper lip, Amṛtakalā -lower lip, Sarasvatī -tongue, Kaumārī -teeth, Caṇḍikā - throat, Citraghaṇṭā - soundbox, Mahāmāyā - palate, Kāmākṣī -chin, Sarvamaṃgalā -speech, Bhadrakālī -neck and Dhanurdharī -back. ||24-26||

May Nīlagrīvā protect the outer part of my throat and Nalakūbarī -windpipe, may Khaḍginī protect my shoulders and Vajradhāriṇī protect my arms. ||27||

May Devi Daṇḍinī protect both my hands, Ambikā -fingers, Śūleśvarī my nails and may Kuleśvarī protect my belly. May Mahādevī protect my breast, Śokavināśinī -abdomen, Lalitā Devī -heart, Kāminī -navel, Guhyeśvarī -hidden parts, Pūtanā Kāmikā -reproductive organs and Mahiṣavāhanī -excretory organ. ||28-30||

May Goddess Bhagavatī protect my waist, Vindhyavāsinī -knees and the wish-fulfilling Mahābalā may protect my hips. ||31||

May Nārasiṃhī protect my ankles, Taijasī - my feet, Śrīdevī - my toes and Talavāsinī - the soles of my feet. ||32||

May Daṃṣṭrākarālī protect my nails, Urdhvakeśinī - hair, Kauberī - pores and Vāgīśvarī - skin. ||33||May Goddess Pārvatī protect blood, marrow of the bones, lymph, flesh, bone and fat; Goddess Kālarātri -intestines and Mukuṭeśvarī-bile. ||34||

May Padmāvatī protect the lungs, Cūḍāmaṇi -phlegm, Jvālāmukhī -lustre of the nails and Abhedyā - all the joints. ||35||

May Brahmāṇi protect semen, Chatreśvarī - the shadow of my body and Dharmadhāriṇī -ego, mind and intellect. ||36||

Vajrahastā may protect Prāṇa, Apāna, Vyāna, Udāna, Samāna (five vital breaths) and Kalyāṇaśobhanā - pranas (life force). ||37||

May Yoginī protect the sense organs, that is, the faculties of tasting, seeing, smelling, hearing and touching. May Nārāyaṇī always protect Satva, Rajasa and Tamasa. ||38||

May Vārāhī protect the span of my life, Vaiṣṇavī guard Dharma (virtue), Cakriṇī protect always my fame, glory, wealth and knowledge. ||39||

May Indrāṇi guard my lineage, Caṇḍika protect my cattle, Mahālakṣmī protect my children and Bhairavī protect my wife. ||40||

Supathā may protect my journey and Kṣemakarī my way. Mahālakṣmī may protect me at the royal gate and Vijayā everywhere. ||41||

Any place that has not been mentioned in the Kavaca and left unprotected, may be protected by Jayantī, the victorious, sin-destroying goddess. ||42||

If one seeks his own welfare, he ought not to take even a single step without this. Wherever one goes, being covered by the armour, he gets monetary benefits and victory in attaining all desires. Whatever desire one contemplates, that he certainly obtains and that person acquires supreme and unparalleled prosperity on the earth. ||43-44||

The person who covers himself with this armour becomes fearless and remains undefeated in the battle and becomes worthy of being worshipped in all three worlds. ||45||

This armour of the goddess is inaccessible even to the Gods. One, who recites this at the three intervals of the day (in the morning, afternoon and evening) with full faith, receives divine traits and remains unconquered in the three worlds. He lives for a full hundred years and is free from sudden or accidental death. ||46-47||

All disease, like cuts, boils etc. come to an end. All types of poisons moveable (scorpions and snakes), immoveable or other poisons are rendered ineffective. ||48||

All spells, Mantras (incantations) and Yantras (mystical diagrams used as amulet) in the world, Bhūcaras (those who move on the earth), Khecaras (those who move in the air) or Jalajas (those born in water), or Upadeśikas (those taught by others), Sahajās (self – arisen/ born with birth) or born in family, Mālās (those wearing a garland) those who feed on flesh/abiding in the sky), the Śākinīes (those who feed on vegetables), and such, those terrible, howling Ḍākinīs that move through the atmosphere, evil planets, spirits, fiends, heavenly nymphs and celestial minstrels, demons, Brahmarākṣasas (cosmic forces of disturbances), Vetālas (goblins/ ghosts occupying dead body), Kuṣmāṇḍas (evil forces on the vegetations), Bhairavas (the forces of Śiva's armoury (eight in number)), and so forth, all these perish just by the sight of the person having Kavaca in his heart.That person would increasingly be honoured by the king. This armour enhances the glory of the person. ||49-52||

He grows in fame, becoming renowned throughout the world. Having first done the armour, one should recite the Caṇḍī of seven hundred verses. As long as the earth's globe with its mountains, forests, and groves shall remain, so long will his descendants of sons and grandsons of the reader of the Caṇḍī shall remain on the earth. ||53-54||

At his demise, the reader of Caṇḍī will attain the supreme abode by the grace of the supreme goddess, which is attainable with much difficulty even by the gods. ||55||

He attains the supreme form and enjoys the company of Lord Śiva. ||56||



ॐ चण्डिका देवी को नमस्कार है ।

मार्कण्डेयजी ने (ब्रह्माजी से) कहा - हे पितामह ! जो इस संसार में अत्यन्त गोपनीय एवं सब प्रकार से मनुष्यों की रक्षा करने वाला है तथा जो आज तक आपने किसी के लिए न कहा हो, वह मुझसे कहें ।।१।।

ब्रह्माजी बोले – हे विप्र ! सम्पूर्ण प्राणियों का उपकार करने वाला अत्यन्त गोपनीय तथा पवित्र साधन तो एक देवी का कवच ही है । महामुने ! उसे श्रवण करो ।।२।।

देवी की नौ मूर्तियाँ हैं जिन्हे नवदुर्गा कहते हैं - प्रथम मूर्ति का नाम शैलपुत्री है, दूसरी का नाम ब्रह्मचारिणी है, तीसरी का नाम चन्द्रघण्टा, चौथी का नाम कूष्माण्डा, पाँचवी का नाम स्कन्दमाता, छठीं का नाम कात्यायनी, सातवीं का नाम कालरात्रि और आठवीं का नाम महागौरी है, नवीं दुर्गा का नाम सिद्धिदात्री है । इस प्रकार ये नवदुर्गाएँ कही गई हैं । ये सभी नाम सर्वज्ञ महात्मा वेद भगवान् के द्वारा ही प्रतिपादित किये गये हैं । अग्नि में जलता हुआ, रणभूमि में शत्रुओं से घिरा हुआ, विषम संकटो में फँसा हुआ तथा भय से आतुर होकर जो भगवती दुर्गा की शरण में प्राप्त हुआ हो उनका युद्ध के संकट में भी कभी कोई अमंगल नहीं होता है । उनके ऊपर कोई विपत्ति नहीं दिखायी देती । उन्हें शोक, दुःख और भय की प्राप्ति नहीं होती ।।६-७।।

जिनके द्वारा तुम्हारा भक्तिपूर्वक स्मरण किया गया है, उनका निश्चय ही अभ्युदय होता है । हे देवेश्वरि ! जो तुम्हारा चिन्तन करते हैं, उनकी तुम निःसन्देह रक्षा करती हो ।।८।।
चामुण्डा-देवी प्रेत पर आरुढ होती हैं । वाराही भैंसे पर सवारी करती हैं । ऐन्द्री ऐरावत हाथी पर समारूढ़ होती हैं । वैष्णवी-देवी का आसन गरुड है ।। ९।।

माहेश्वरी वृषभ पर आरुढ होती हैं । कौमारी का वाहन मयूर है । भगवान् विष्णु की प्रियतमा लक्ष्मी देवी कमल के आसन पर विराजमान हैं और हाथों में कमल धारण किये हुए हैं ।। १०।।

श्वेत रूप धारण की हुई ईश्वरी वृषभ पर आरुढ़ हैं । सब प्रकार के आभूषणों से विभूषित ब्राह्मी-देवी हंस पर बैठी हुई हैं ।। ११।।

इस प्रकार ये सभी माताएँ सब प्रकार की योग-शक्तियों से सम्पन्न हैं । अनेक प्रकार के आभूषणों की शोभा से युक्त, अनेक प्रकार के रत्नों से सुशोभित तथा क्रोध में भरी अनेक देवियाँ भी रथ पर बैठी दिखायी दे रही हैं जो शंख, चक्र, गदा, शक्ति, हल, मुसल, खेटक, तोमर, परशु, पाश, कुन्त, त्रिशूल एवं उत्तम शार्ङ्ग-धनुष आदि अस्त्र-शस्त्रों को दैत्यों के शरीर का नाश करने, भक्तों को अभयदान देने और देवताओं का कल्याण करने के लिए अपने हाथों में धारण करती हैं ।। १३-१५ ।।

हे महान् रोद्ररूपवाली ! अत्यन्त घोर पराक्रमवाली ! महान् बल और महान् उत्साहवाली ! महान् भय का नाश करने वाली देवि ! तुम्हें नमस्कार है ।।१६।।

कठिनता से देखे जा सकने वाली तथा शत्रुओं का भय बढ़ाने वाली हे जगदम्बिके ! मेरी रक्षा करो । ऐन्द्री (इन्द्र की शक्ति) पूर्व दिशा में मेरी रक्षा करें । अग्निदेवता अग्निकोण में, वाराही दक्षिण दिशा में तथा खड्गधारिणी नैर्ऋत्य-कोण में मेरी रक्षा करें । वारूणी पश्चिम दिशा में और मृगवाहिनी (मृग पर सवारी करने वाली देवी) वायव्यकोण में मेरी रक्षा करें ।। १७-१८।।

कौमारी उत्तर दिशा में और शूलधारिणी-देवी ईशान-कोण में रक्षा करें । ऊपर की ओर से ब्रह्माणि ! मेरी रक्षा करें और नीचे की ओर से वैष्णवी देवी मेरी रक्षा करें ।। १९।।

इसी प्रकार दसों दिशाओं में शव को अपना वाहन बनाने वाली चामुण्डा मेरी रक्षा करें ।जया आगे से तथा विजया पीछे की ओर से मेरी रक्षा करें ।।२०।।

अजिता वाम भाग में तथा अपराजिता दक्षिण भाग में रक्षा करें । शिखा की उद्योतिनी रक्षा करें । उमा मेरे मस्तक पर विराजमान होकर रक्षा करें ।। २१।।

मालाधारी ललाट की रक्षा करें और यशस्विनी देवी मेरी भौंहों की रक्षा करें । त्रिनेत्रा भौंहो के मध्य भाग में और यमघण्टा नथुनों की (नासिकापुट की) रक्षा करें ।।२२।।

दोनों नेत्रों के मध्यभाग में शंखिनी तथा द्वारवासिनी कानों की रक्षा करें । कालिका-देवी कपोलों की तथा शांकरी कानों के मूलभाग की रक्षा करें । ।२३।।

सुगन्धा नासिका में और चर्चिका देवी ऊपर के ओठ की रक्षा करें । अमृतकला नीचे के ओठ की तथा सरस्वती जिह्वा की रक्षा करें ।। २४।।

कौमारी दाँतो की और चण्डिका कण्ठप्रदेश की रक्षा करें । चित्रघण्टा गले की घाँटी की (घण्टिका की) और महामाया तालु की रक्षा करें ।।२५।।

कामाक्षी ठोढ़ी की (चिबुक की) और सर्वमंगला मेरी वाणी की रक्षा करें । भद्रकाली ग्रीवा की और धनुर्धरी पृष्ठवंश (मेरुदण्ड) में रहकर रक्षा करें ।।२६।।

नीलग्रीवा कण्ठ के बाहरी भाग में और नलकूबरी कण्ठ की नली में रक्षा करें । खड्गिनी दोनों कंधो की और वज्रधारिणी मेरी दोनों भुजाओं की रक्षा करें ।।२७।।

दोनों हाथों की दण्डिनी और अंगुलियों की अम्बिका रक्षा करें । शूलेश्वरी नखों की रक्षा करें । कुलेश्वरी कुक्षि (पेट) में रहकर रक्षा करें ।। २८।।

दोनों स्तनों की महादेवी और मन की शोकविनाशिनी देवी रक्षा करें । हृदय में ललिता-देवी और उदर में रहकर शूलधारिणी रक्षा करें ।। २९।।

कामिनी नाभि में और गुह्येश्वरी गुह्यभाग की रक्षा करें । पूतना और कामिका लिंग की और महिषवाहनी गुदा की रक्षा करें ।।३० ।।

कटिभाग में भगवती और विन्ध्यवासिनी घुटनों की रक्षा करें । सम्पूर्ण कामनाओं को देने वाली महाबला-देवी दोनों पिण्डलियों की रक्षा करें ।।३१।।

नारसिंही दोनों गुल्फों (घुट्टियों) की और तैजसी-देवी दोनों चरणों के पृष्ठभाग की रक्षा करें । पैरों की अंगुलियों की श्रीदेवी और तलवासिनी पैरों के तलुओं में रहकर रक्षा करें ।।३२।।

अपनी दाढ़ो के कारण भयंकर दिखायी देने वाली दंष्ट्राकराली-देवी नखों की और उर्ध्वकेशिनी-देवी केशों की रक्षा करें । कौबेरी रोमावलियों के छिद्रों में तथा वागीश्वरी देवी त्वचा की रक्षा करें ।।३३।।

पार्वती-देवी रक्त, मज्जा, वसा, मांस, हड्डी और मेद की रक्षा करें । कालरात्रि आँतो की और मुकुटेश्वरी पित्त की रक्षा करें ।।३४।।

पद्मावती मूलाधार आदि कमल-कोशों में और चूडामणि-देवी कफ में स्थित होकर रक्षा करें । ज्वालामुखी नख के तेज की रक्षा करें । जिसका किसी भी अस्त्र से भेदन नहीं हो सकता, वह अभेद्या-देवी शरीर की समस्त संधियों में रहकर रक्षा करें ।।३५।।

ब्रह्माणि ! आप मेरे वीर्य की रक्षा करें । छत्रेश्वरी छाया की तथा धर्मधारिणी-देवी मेरे अंहकार, मन और बुद्धि की रक्षा करें ।।३६।।

हाथ में वज्र धारण करने वाली वज्रहस्ता-देवी मेरे प्राण, अपान, व्यान ,उदान और समान वायु की रक्षा करें । कल्याण से सुशोभित होने वाली भगवती कल्याणशोभना मेरे प्राण की रक्षा करें ।।३७।।

योगिनी-देवी रस, रुप, गन्ध, शब्द और स्पर्श – इन विषयों का अनुभव करते समय रक्षा करें तथा नारायणी-देवी सदा सत्त्वगुण, रजोगुण और तमोगुण की रक्षा करें ।।३८।।

आयु की रक्षा वाराही करें। वैष्णवी धर्म की रक्षा करें तथा चक्रिणी (चक्र धारण करने वाली) देवी यश, कीर्ति, लक्ष्मी, धन तथा विद्या की रक्षा करें।।३९।।

इन्द्राणि मेरे गोत्र की रक्षा करें। चण्डिका मेरे पशुओं की रक्षा करें। महालक्ष्मी पुत्रों की रक्षा करें और भैरवी पत्नी की रक्षा करें।। ४०।।

सुपथा मेरे पथ की तथा क्षेमकरी मार्ग की रक्षा करें। महालक्ष्मी राजा के दरबार में रक्षा करें तथा सब ओर व्याप्त रहने वाली विजया-देवी सम्पूर्ण भयों से मेरी रक्षा करें।। ४१।।

देवि ! कवच के द्वारा नहीं कहे गये जो भी रक्षा से रहित स्थान हों, मेरे उन सभी स्थानों की पापनाशिनी जयन्ती-देवी रक्षा करें।। ४२।।

यदि अपना हित चाहे तो मनुष्य बिना कवच के कहीं एक पग भी न जाय, कवच का पाठ करके ही यात्रा करे। सब ओर से कवच के द्वारा सुरक्षित मनुष्य जहाँ-जहाँ भी जाता है, वहाँ-वहाँ उसे धन का लाभ होता है तथा सम्पूर्ण कामनाओं की सिद्धि करने वाली विजय प्राप्ति होती है। व्यक्ति जिस-जिस अभीष्ट वस्तु का चिन्तन करता है, उस – उस अभीष्ट वस्तु को वह अवश्य ही प्राप्त कर लेता है। वह व्यक्ति इस पृथ्वी पर तुलना रहित महान् ऐश्वर्य का भागी होता है।। ४३-४४।।

कवच से सुरक्षित मनुष्य भय रहित हो जाता है। उसकी युद्ध में पराजय नहीं होती तथा वह तीनों लोकों में पूजनीय होता है।।४५।।

देवताओं के लिये भी देवी का यह कवच दुर्लभ है। जो भी मनुष्य प्रतिदिन नियमपूर्वक तीनों संध्याओं के समय श्रद्धापूर्वक इसका पाठ करता है, उसे दैवी कला प्राप्त होती है तथा वह तीनों लोकों में कहीं भी पराजित नहीं होता है। वह अपमृत्यु से रहित हो सौ से भी अधिक वर्षों तक जीवित रहता है।। ४६-४७।।

उसकी लूता, विस्फोटक आदि सम्पूर्ण व्याधियाँ नष्ट हो जाती हैं। स्थावर (अफीम, धतूरे आदि का) जंगम (साँप और बिच्छू आदि के काटने से चढ़ा हुआ) तथा कृत्रिम (अहिफेन और तेल के संयोग आदि से बनने वाले) ये सभी प्रकार के विष, पृथ्वी पर होने वाले सभी प्रकार के मारण-मोहन आदि आभिचारिक प्रयोग, मन्त्र-यन्त्र ये सब इस कवच को हृदय में धारण कर लेने पर उस मनुष्य को देखते ही नष्ट हो जाते हैं। पृथ्वी पर विचरने वाला ग्रामदेवता, आकाशचारी देवविशेष, जल के सम्बन्ध से प्रकट होने वाल गण, उपदेश मात्र से सिद्ध होने वाले निम्नकोटि के देवता, अपने जन्म के साथ प्रकट होने वाले देवता, कुल-देवता, माला (कण्ठमाला आदि), डाकिनी, शाकिनी, अन्तरिक्ष में विचरने वाली अत्यन्त बलवती भयानक डाकिनियाँ, ग्रह, भूत, पिशाच, यक्ष, गन्धर्व, राक्षस, ब्रह्मराक्षस, बेताल, कूष्माण्ड और भैरव आदि अनिष्टकारक देवता भी हृदय में कवच धारण किये रहने पर उस मनुष्य को देखते ही नष्ट हो जाते हैं। कवचधारी पुरुष को राजा से मान तथा उन्नति प्राप्त होती है। यह कवच मनुष्य के तेज की वृद्धि करने वाला तथा श्रेष्ठ है।।४९-५२।।

जो भी व्यक्ति कवच का पाठ करता है वह अपनी कीर्ति से मण्डित भूतल पर अपने सुयश के साथ-साथ वृद्धि को प्राप्त होता है। जो व्यक्ति पहले कवच का पाठ करके उसके पश्चात् सप्तशती चण्डी का पाठ करता है, उसकी पुत्र-पौत्र आदि संतान-परम्परा तब तक बनी रहती है जब तक वन, पर्वत और काननों (उद्यानों) सहित यह पृथ्वी रहती है।।५३-५४।।

देहान्त होने पर वह व्यक्ति महामाया के प्रसाद से उस नित्य परमपद को प्राप्त होता है, जो देवताओं के लिये भी दुर्लभ है।।५५।।

वह व्यक्ति परम दिव्य रूप धारण करता है तथा शिव के साथ आनन्दित होता है।। ५६।।

अथार्गलास्तोत्रम्

Athārgalāstotram

The Stopper

अथार्गलास्तोत्रम्

Athārgalāstotram (The Stopper)

ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता, श्रीजगदम्बाप्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ।

Oṃ asya śrīargalāstotramantrasya viṣṇurṛṣiḥ, anuṣṭup chandaḥ, śrīmahālakṣmīrdevatā, śrījagadambāprītaye saptaśatīpāṭhāṅgatvena jape viniyogaḥ.

ॐ नमश्चण्डिकायै ।।

Oṃ namaścaṇḍikāyai

मार्कण्डेय उवाच

mārkaṇḍeya uvāca



ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ।।१।।

Oṃ jayantī maṅgalā kālī bhadrakālī kapālinī
durgā kṣamā śivā dhātrī svāhā svadhā namo'stu te

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ।।२।।

jaya tvaṃ devi cāmuṇḍe jaya bhūtārtihāriṇi
jaya sarvagate devi kālarātri namo'stu te

मधुकैटभविद्राविविधातृवरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। ३।।

madhukaiṭabhavidrāvividhātṛvarade namaḥ
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

महिषासुरनिर्णाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। ४।।

mahiṣāsuranirṇāśi bhaktānāṃ sukhade namaḥ
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। ५।।
raktabījavadhe devi caṇḍamuṇḍavināśini
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। ६।।
śumbhasyaiva niśumbhasya dhūmrākṣasya ca mardini
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। ७।।
vanditāṅghriyuge devi sarvasaubhāgyadāyini
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। ८।।
acintyarūpacarite sarvaśatruvināśini
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। ९।।
natebhyaḥ sarvadā bhaktyā caṇḍike duritāpahe
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। १०।।
stuvadbhyo bhaktipūrvaṃ tvāṃ caṇḍike vyādhināśini
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi



चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।११ ।।
caṇḍike satataṃ ye tvāmarcayantīha bhaktitaḥ
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

देहि सौभाग्यमारोग्यं देहि मे परमं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१२।।

dehi saubhāgyamārogyaṃ dehi me paramaṃ sukham
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१३ ।।

vidhehi dviṣatāṃ nāśaṃ vidhehi balamuccakaiḥ
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

विधेहि देवि कल्याणं विधेहि परमां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। १४।।

vidhehi devi kalyāṇaṃ vidhehi paramāṃ śriyam
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१५।।

surāsuraśiroratnanighṛṣṭacaraṇe'mbike
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्त जनं कुरु ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। १६।।

vidyāvantaṃ yaśasvantaṃ lakṣmīvanta janaṃ kuru
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। १७।।

pracaṇḍadaityadarpaghne caṇḍike praṇatāya me
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१८।।

caturbhuje caturvaktrasaṃstute parameśvari
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। १९।।
kṛṣṇena saṃstute devi śaśvadbhaktyā sadāmbike
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

हिमाचलसुतानाथसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। २०।।
himācalasutānāthasaṃstute parameśvari
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।२१ ।।
indrāṇīpatisadbhāvapūjite parameśvari
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। २२ ।।
devi pracaṇḍadordaṇḍadaityadarpavināśini
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।। २३।।
devi bhaktajanoddāmadattānandodaye'mbike
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ।।२४।।
patnīṃ manoramāṃ dehi manovṛttānusāriṇīm
tāriṇī durgasaṃsārasāgarasa kulodbhavām

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ।। ॐ ।। २५।।
idaṃ stotraṃ paṭhitvā tu mahāstotraṃ paṭhennaraḥ
sa tu saptaśatīsaṃkhyāvaramāpnoti sampadām



।। इति देव्या अर्गलास्तोत्रं सम्पूर्णम् ।।
iti devyā argalāstotraṃ sampūrṇam

Argalāstotra
(The Stopper)

Oṃ. Of the Mantra of this Argalāstotra (bolt), Viṣṇu is the Ṛṣi (sage), Anuṣṭup (32 syllables to the verse) is the meter (chanda), Śrīmahālakṣmī is the presiding Deity; to be recited as a part of Saptaśatī, to please Jagadambā, the mother of the universe.

Oṃ. Reverence to Caṇḍikā. Mārkaṇḍeya said:

Oh! Jayantī (Conqueror of all / the Ever-Victorious), Maṃgalā (Auspicious one), Kālī, Bhadrakālī, Kapālinī (bearer of the Skulls), Durgā (reliever of difficulties), Śivā (of the nature of pure consciousness), Kṣamā (compassionate), Dhātrī (supporter of the universe), Svāhā (the nourisher of the gods), Svadhā (one who pleases the pitṛs); salutations to you. ||1||

Be victorious, O Goddess Cāmuṇḍā; be victorious, the remover of worldly afflictions and sorrows; be victorious, all pervading goddess; O Goddess Kālarātri (a form of Devi Durgā, literally means the Dark Night), I bow down to you. ||2||

O goddess, destroyer of the demons Madhu and Kaiṭabha, giver of boon to Brahmā, salutations to you. Grant (spiritual) beauty, give the victory, give the glory and kill the enemies. ||3||

O Goddess, the destroyer of the demon Mahiṣāsura, O giver of happiness to devotees, salutations to you. Grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||4||

O goddess, slayer of Raktabīja and destroyer of Caṇḍa and Muṇḍa; Grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||5||

O destroyer of Śumbha, Niśumbha and Dhūmrākṣa, grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||6||

Salutations to the goddess whose pair of feet is praised by all, and who is the bestower of all well-being. Grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||7||

O you of inconceivable form and deeds, O destroyer of all enemies! Grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||8||

O Caṇḍikā! O remover of sins! Grant (spiritual) beauty, give the victory, give the glory and destroy the foes of those who bow to you always in devotion. ||9||

O Caṇḍikā, the remover of the diseases, grant (spiritual) beauty, give the victory, give the glory and destroy the foes of those who praise you with devotion. ||10||

O Caṇḍikā, to those who constantly praise you here because of their devotion, grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||11||

Give me good fortune and health, give me supreme happiness. Grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||12||

O goddess, bestow on me good fortune and abundant prosperity; grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||13||

Those who are envious of me, destroy them, ordain in me the great strength; grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||14||

O you whose feet are rubbed by the precious jewels of the crowns of the gods and the demons, O Ambikā! Grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||15||

Endow me with the knowledge (of the supreme self), glory and prosperity. Grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||16||

O Caṇḍikā, destroyer of the pride of furious demons, to me who am bowed down; grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||17||

O four-armed supreme sovereign, praised by the four-faced Brahmā, grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||18||

O Ambikā, always praised by Lord Kṛṣṇa with constant devotion, grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||19||

O Supreme sovereign, who are praised by the husband of Himalaya's daughter (Śiva), grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||20||

O Supreme sovereign, who are worshipped with true devotion by the Consort of Indrāṇī (Indra Deva), grant (spiritual) beauty, give the victory, give the glory and kill the enemies. ||21||

O goddess, destroying the pride of the fearsome long armed demons; Grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||22||

O goddess Ambikā, granting boundless bliss to the devotees; grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||23||

Grant me a pleasing wife, born of a good family, who follows my inclinations and who enables me to cross the difficult ocean of the worldly existence. Grant (spiritual) beauty, give the victory, give the glory and destroy my foes. ||24||

After reciting this hymn of praise one should recite the great hymn of praise the number of which is seven hundred verses, (than) he will obtain amply rich affluence. ||25||



अर्गलास्तोत्र



मार्कण्डेय ऋषि ने कहा कि - जयन्ती, मंगला, काली, भद्रकाली, कपालिनी, दुर्गा क्षमा,शिवा, धात्री, स्वाहा और स्वधा- इन नामों से प्रसिद्ध हे देवि ! तुम्हें मेरा नमस्कार प्राप्त हो । हे देवि चामुण्डे ! तुम्हारी जय हो । सभी प्राणियों की पीड़ा हरने वाली हे देवि ! तुम्हारी जय हो । हे सर्वव्यापक देवि ! तुम्हारी जय हो । हे कालरात्रि ! तुम्हे नमस्कार हो ।।१-२।।

मधु और कैटभ को मारने वाली तथा ब्रह्मा को वर देने वाली हे देवि ! तुम्हें नमस्कार है । तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।३।।

महिषासुर का नाश करने वाली तथा भक्तों को सुख देने वाली देवि ! तुम्हें नमस्कार है । तुम रूप दो, जय दो , यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।४।।

रक्तबीज का वध और चण्ड-मुण्ड का विनाश करने वाली हे देवि ! तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो । ।।५।।

शुम्भ और निशुम्भ तथा धूम्रलोचन का मर्दन करने वाली हे देवि ! तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।६।।

सबके द्वारा वन्दित युगल चरणों वाली तथा सम्पूर्ण सौभाग्य प्रदान करने वाली हे देवि ! तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।७।।

अचिन्त्य रूप और चरित्र वाली तथा समस्त शत्रुओं का नाश करने वाली हे देवि ! रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।८।।

पापों को दूर करने वाली चण्डिके ! जो भक्तिपूर्वक तुम्हारे चरणों में सर्वदा नतमस्तक रहते हैं, उन्हें रूप दो, जय दो यश दो, और काम-क्रोध आदि शत्रुओं का नाश करो ।।९।।

व्याधियों का नाश करने वाली हे चण्डिके ! भक्ति पूर्वक तुम्हारी स्तुति करने वालों को रूप दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।१०।।

चण्डिके ! इस संसार में जो भक्तिपूर्वक तुम्हारी अर्चना करते हैं, उन्हें रूप दो, जय दो, यश दो और उनके काम-क्रोध आदि शत्रुओं का नाश करो ।।११।।

मुझे सौभाग्य और आरोग्य दो । मुझे परम सुख दो । रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।१२।।

जो मुझसे द्वेष रखते हों उनका नाश करो और मुझे श्रेष्ठ बल दो । रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।१३।।

देवि ! मेरा कल्याण करो । मुझे श्रेष्ठ सम्पत्ति प्रदान करो । रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।१४।।

देवता और असुर दोनों के माथे के मुकुट की मणियों से जिसके चरण घिसे जाते हैं ऐसी हे अम्बिके ! तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।१५।।

तुम अपने भक्तजन को विद्यावान्, यशस्वी और लक्ष्मीवान् बनाओ तथा रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।१६।।

प्रचण्ड दैत्यों के दर्प का हनन करने वाली चण्डिके ! मुझ प्रणत (शरणागत) को रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।१८।।

चार मुख वाले ब्रह्माजी के द्वारा प्रशंसित चार भुजाओं वाली परमेश्वरि ! तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।१९।।

भगवान् विष्णु के द्वारा नित्य भक्तिपूर्वक संस्तुत हे देवि अम्बिके ! तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।१९।।

हिमालय-कन्या पार्वती के स्वामी भगवान् शिव के द्वारा पूजित हे परमेश्वरि ! तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।२०।।


इन्द्राणिपति (शचीपति) इन्द्र के द्वारा सद्भावपूर्वक पूजित हे परमेश्वरि ! तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।२१।।

प्रचण्ड भुजदण्डों वाले दैत्यों का घमण्ड चूर करने वाली हे देवि ! तुम रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।२२।।

भक्तजनों में उत्तम भक्तों को दे दिया है आनन्दोदोय (मोक्ष) जिसने ऐसी हे देवि अम्बिके ! मुझे रूप दो, जय दो, यश दो और काम-क्रोध आदि शत्रुओं का नाश करो ।।२३।।

मन की इच्छा के अनुसार चलने वाली, दुर्गम संसार सागर से तारने वाली तथा उत्तम कुल में उत्पन्न मनोरमा पत्नी प्रदान करो ।।२४।।

जो मनुष्य इस (अर्गला) स्तोत्र का पाठ करके महास्तोत्र (सप्तशती रूप महास्तोत्र) को पढ़ता है, वह सप्तशती की जप- संख्या से मिलने वाले श्रेष्ठ-फल को प्राप्त करने के साथ ही प्रचुर सम्पत्ति भी प्राप्त करता है ।।२५।।



अथ कीलकम्
Atha Kīlakam
(The Nail of the Goddess)

अथ कीलकम्

Atha Kīlakam
(The Nail of the Goddess)

ॐ अस्य श्रीकीलकमन्त्रस्य शिव ऋषिः, अनुष्टुप् छन्दः, श्रीमहासरस्वती देवता, श्रीजगदम्बाप्रीत्यर्थं सप्तशतीपाठाङ्गत्वेन जपे विनियोगः।

Oṃ asya śrīkīlakamantrasya śiva ṛṣiḥ, anuṣṭup chandaḥ, śrīmahāsarasvatī devatā, śrījagadambāprītyarthaṃ saptaśatīpāṭhāṅgatvena jape viniyogaḥ

ॐ नमश्चण्डिकायै ।।

Oṃ namaścaṇḍikāyai

मार्कण्डेय उवाच



ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ।। १।।

mārkaṇḍeya uvāca
Oṃ viśuddhajñānadehāya trivedīdivyacakṣuṣe
śreyaḥprāptinimittāya namaḥ somārdhadhāriṇe

सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम् ।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ।। २।।

sarvametadvijānīyānmantrāṇāmabhikīlakam
so'pi kṣemamavāpnoti satataṃ jāpyatatparaḥ

सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवीं स्तोत्रमात्रेण सिद्ध्यति ।। ३।।

siddhyantyuccāṭanādīni vastūni sakalānyapi
etena stuvatāṃ devīṃ stotramātreṇa siddhayati

न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते ।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ।। ४।।
na mantro nauṣadhaṃ tatra na kiñcidapi vidyate
vinā jāpyena siddhyeta sarvamuccāṭanādikam

समग्राण्यपि सिद्धयन्ति लोकशङ्कामिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ।। ५।।
samagrāṇyapi siddhayanti lokaśaṅkāmimāṃ haraḥ
kṛtvā nimantrayāmāsa sarvamevamidaṃ śubham



स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः ।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् ।। ६।।
stotraṃ vai caṇḍikāyāstu tacca guptaṃ cakāra saḥ
samāptirna ca puṇyasya tāṃ yathāvanniyantraṇām

सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः ।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ।। ७।।
so'pi kṣemamavāpnoti sarvamevaṃ na saṃśayaḥ
kṛṣṇāyāṃ vā caturdaśyāmaṣṭamyāṃ vā samāhitaḥ

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।
इत्थंरूपेण कीलेन महादेवेन कीलितम् ।। ८।।
dadāti pratigṛhṇāti nānyathaiṣā prasīdati
itthaṃrūpeṇa kīlena mahādevena kīlitam

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम्।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ।। ९।।
yo niṣkīlāṃ vidhāyaināṃ nityaṃ japati saṃsphuṭam
sa siddhaḥ sa gaṇaḥ so'pi gandharvo jāyate naraḥ

न चैवाप्यटतस्तस्य भयं क्वापीह जायते ।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ।। १०।।
na caivāpyaṭatastasya bhayaṃ kvāpīha jāyate
nāpamṛtyuvaśaṃ yāti mṛto mokṣamavāpnuyāt

ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ।। ११।।
jñātvā prārabhya kurvīta na kurvāṇo vinaśyati
tato jñātvaiva sampannamidaṃ prārabhyate budhaiḥ

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने ।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ।। १२।।
saubhāgyādi ca yatkiñcid dṛśyate lalanājane
tatsarvaṃ tatprasādena tena jāpyamidaṃ śubham

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ।। १३।।
śanaistu japyamāne'smin stotre sampattiruccakaiḥ
bhavatyeva samagrāpi tataḥ prārabhyameva tat

ऐश्वर्यं तत्प्रसादेन सौभाग्यारोग्यसम्पदः ।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ।।ॐ।। १४।।
aiśvaryaṃ tatprasādena saubhāgyārogyasampadaḥ
śatruhāniḥ paro mokṣaḥ stūyate sā na kiṃ janaiḥ. Oṃ.

।। इति श्रीभगवत्याः कीलकस्तोत्रं समाप्तम् ।।
iti śrībhagavatyāḥ kīlakastotraṃ samāptam

Kīlaka
(The Nail of the Goddess)

Om. Of the Mantra of this Kīlakastotra (the Nail of the Goddess) Śiva is the Ṛṣi (Sage), Anuṣṭup (32 syllables to the verse) is the meter (Chanda), Śrīmahāsarasvatī is the presiding Deity; to be recited as a part of Saptaśatī, to please Jagadambā, the mother of the universe.

Mārkaṇḍeya said:- My salutations to lord (Śiva) whose body is pure knowledge, the three Vedas are whose holy eyes, who is the prime cause of attaining the supreme and who wears the crescent moon (on his forehead). ||1||

One should know everything about this foremost bolt of mantras. Whoever chants other holy mantras also gets benefit and attains success in acts like uccāṭana etc. For those who offer praise with the hymn of Devīmāhātmya, the goddess is pleased by the mere recitation of it. ||2-3||

He requires neither (chanting of) other verses nor medicine. Even without uttering other mantras one can attain success in uccāṭana etc. mere by the recitation of Devīmāhātmya. "Will everything be fulfilled by this?" Anticipating such a doubt of the people Lord Śiva ordained that this entire Devīmāhātmya is auspicious. ||4-5||

Thereafter he (Lord Śiva) made this hymn to Caṇḍikā (the Devīmāhātmya) a secret. There is no end to the fruits that can be received by it, so Devīmāhātmya was considered the best by Lord Śiva and it should be accepted as it is. ||6||

There is no doubt that a person who practices other mantras can also attain complete wellbeing by the recitation of these hymns of Caṇḍikā.
The devotee should meditate with full concentration on the fourteenth or eighth days of the dark lunar fortnight and offers his all to the goddess, and receives it back from her. Unless he does that the goddess will not be pleased with him. This has been fixed like a driving nail by Lord Śiva. ||7-8||

Whoever constantly recites this Stotra, loud and clear, having removed the restraint upon it, surely becomes Siddha (a perfect being), Gaṇa (a divine attendant) or Gandharva (a celestial singer). ||9||

Even when he wanders he will have no fear anywhere (in the world), he will never be subject to untimely death and after death he will attain salvation. ||10||

Having understood, one should commence and perform (the recitation of the Durgāsaptaśatī), if it is not done this way, one perishes. Knowing thus, the wise performs the recitation of the Stotra in prescribed way. ||11||

Good fortune and whatever auspicious qualities etc. are seen among women-folk, all that is by her grace, for that reason this hymn is to be recited. ||12||

If this is recited slowly, the fruit is less and if chanted loudly and clearly, one gets complete benefits, so this should be chanted loudly. ||13||

Whose grace bestows all prosperity, good fortune, health, profuse wealth, the destruction of enemies and supreme liberation, why don't people adore her? ||14||

मार्कण्डेय जी ने कहा - विशुद्ध ज्ञान रूप शरीर वाले, तीनों वेद रूप दिव्य नेत्रों वाले, कल्याण-प्राप्ति के हेतुभूत तथा अपने मस्तक पर अर्धचन्द्र का मुकुट धारण करने वाले भगवान शिव को मेरा नमस्कार है ।।१।।

मन्त्रों के अभिकीलक को (मन्त्र-सिद्धि में विघ्न उत्पन्न करने वाले शाप रूपी कीलक का निवारण करने वाले सप्तशतीस्तोत्र को) सम्पूर्ण रूप से जानना चाहिये (और उसका ज्ञान प्राप्त कर उसकी उपासना करनी चाहिये) । दुर्गासप्तशती के अतिरिक्त अन्य मन्त्रों के जप में तत्पर रहने वाले का भी कल्याण होता है, उसके भी उच्चाटन आदि सिद्ध होते हैं तथा उन्हें भी सभी वस्तुएँ प्राप्त होती हैं, फिर भी जो अन्य मन्त्रों का जप न करके केवल इस सप्तशती से ही देवी की स्तुति करते हैं, उन्हें स्तुति मात्र से ही देवी सिद्ध हो जाती हैं ।।२-३।।

उन्हें अपने कार्य की सिद्धि के लिए न तो मन्त्र की, न औषधि की और न ही किसी अन्य साधन के उपयोग की आवश्यकता रहती है । जप के बिना ही उनके उच्चाटन आदि समस्त आभिचारिक कर्म सिद्ध होते हैं ।।४।।

जब लोगों के मन में यह आशंका हुई कि 'मात्र सप्तशती की उपासना से अथवा सप्तशती के अतिरिक्त अन्य मन्त्रों की उपासना से भी सभी कार्य सिद्ध होते हैं, तब इनमें से श्रेष्ठ साधन कौन सा है? लोगों की इस शंका को सामने रखकर भगवान् शंकर ने समझाया कि सप्तशती ही अन्य साधनों से श्रेष्ठ एवं कल्याणकारी है ।।५।।

तत्पश्चात् चण्डिका के स्तोत्र को भगवान् शिव ने गुप्त कर दिया । सप्तशती के पाठ से प्राप्त होने वाला पुण्य कभी भी समाप्त नहीं होता है, जबकी अन्य मन्त्रों के जप से उत्पन्न होने वाला पुण्य समाप्त हो जाता है अतः भगवान् शंकर ने सप्तशती को अन्य मन्त्रों की अपेक्षा श्रेष्ठ बताया है, उसे यथार्थ ही जानना चाहिये ।।६।।

जो व्यक्ति अन्य मन्त्रों का जप करता है वह भी यदि सप्तशती के स्तोत्र और जप का अनुष्ठान करे तो वह भी पूर्ण रूप से कल्याण को प्राप्त करता है, इसमें तनिक भी सन्देह नहीं है । कृष्णपक्ष की चतुर्दशी अथवा अष्टमी को जो साधक एकाग्रचित्त होकर भगवती की सेवा में अपना सब कुछ समर्पित कर देता है तथा पुनः उसे प्रसाद के रूप से ग्रहण करता है, देवी भगवती उसी पर प्रसन्न होती है, इसके अतिरिक्त उसे प्रसन्न नहीं किया जा सकता । इस प्रकार से सिद्धि के प्रतिबन्धकरूप कील के द्वारा भगवान् शिव ने इस स्तोत्र को कीलित कर रखा है ।। ६-८।।

जो भी व्यक्ति पूर्वोक्त प्रकार से निष्कीलन करके प्रतिदिन स्पष्ट उच्चारणपूर्वक इस सप्तशती स्तोत्र का पाठ करता है, वह सिद्ध होता है, वही देवी का गण होता है और वही गन्धर्व होता है ।।९।।

कहीं पर भी विचरण करते रहने पर भी इस संसार में उसे कहीं भी भय नहीं लगता । वह अपमृत्यु को प्राप्त नहीं करता तथा मृत्यु के उपरान्त मोक्ष प्राप्त कर लेता है ।।१०।।

अतः कीलन का ज्ञान प्राप्त कर उसका परिहार करने के उपरान्त ही सप्तशती का पाठ आरम्भ करे । ऐसा नहीं करने वाले का विनाश हो जाता है । कीलक और निष्कीलन का ज्ञान प्राप्त करने के उपरान्त ही यह स्तोत्र निर्दोष होता है और विद्वानों द्वारा इस निर्दोष स्तोत्र का ही पाठ किया जाता है ।।११।।

स्त्रियों में सौभाग्य आदि जो कुछ भी दृष्टिगोचर होता है, वह सब देवी की कृपा का ही फल है । अतः इस कल्याणमय स्तोत्र का सदा जप करना चाहिये ।।१२।।

मन्दस्वर से इस स्तोत्र का पाठ करने पर अल्प फल की प्राप्ति होती है तथा उच्चस्वर से पाठ करने पर पूर्ण फल की प्राप्ति होती है । अतः इस स्तोत्र का पाठ उच्चस्वर से ही किया जाना चाहिये ।।१३।।

ऐश्वर्य, सौभाग्य, आरोग्य, सम्पत्ति, शत्रुओं का नाश तथा परम मोक्ष की सिद्धि जिनके प्रसाद से होती है, उन माँ भगवती की स्तुति मनुष्य क्यों नहीं करते ? ।। १४।।

वेदोक्तं रात्रिसूक्तम्

Vedoktaṃ Rātrisūktam

अथ तन्त्रोक्तं रात्रिसूक्तम्

Atha Tantroktaṃ Rātrisūktam

वेदोक्तं रात्रिसूक्तम्

Vedoktaṃ Rātrisūktam

ॐ रात्रीत्याद्यष्टर्चस्य सूक्तस्य कुशिकः सौभरो रात्रिर्वा भारद्वाजो ऋषिः,
रात्रीर्देवता, गायत्री छन्दः, देवीमाहात्म्यपाठे विनियोगः।
Oṃ rātrītyādyaṣṭarcasya sūktasya kuśikaḥ saubharo rātrirvā bhāradvājo ṛṣiḥ, rātrīrdevatā, gāyatrī chandaḥ, devīmāhātmyapāṭhe viniyogaḥ.

ॐ रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः। विश्वा अधि श्रियोऽधित॥ १॥
Oṃ rātrī vyakhyadāyatī purutrā devyakṣabhiḥ
viśvā adhi śriyo'dhita

ओर्वप्रा अमर्त्यानिवतो देव्युद्वतः। ज्योतिषा बाधते तमः॥ २॥
orvaprā amartyānivato devyudvataḥ
jyotiṣā bādhate tamaḥ

निरु स्वसारमस्कृतोषसं देव्यायति। अपेदु हासते तमः॥ ३॥
niru svasāramaskṛtoṣasaṃ devyāyati
apedu hāsate tamaḥ

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि। वृक्षे न वसतिं वयः॥ ४॥
sā no adya yasyā vayaṃ ni te yāmannavikṣmahi
vṛkṣe na vasatiṃ vayaḥ

नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः। नि श्येनासश्चिदर्थिनः॥ ५॥
ni grāmāso avikṣata ni padvanto ni pakṣiṇaḥ
ni śyenāsaścidarthinaḥ

यावया वृक्यं वृकं यवय स्तेनमूर्म्ये। अथा नः सुतरा भव॥ ६॥
yāvayā vṛkyaṃ vṛkaṃ yavaya stenamūrmye
athā naḥ sutarā bhava

उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित। उष ऋणेव यातय॥ ७॥
upa mā pepiśattamaḥ kṛṣṇaṃ vyaktamasthita
uṣa ṛṇeva yātaya

उप ते गा इवाकरं वृणीष्व दुहितर्दिवः। रात्रि स्तोमं न जिग्युषे॥ ८॥
upa te gā ivākaraṃ vṛṇīṣva duhitardivaḥ
rātri stomaṃ na jigyuṣe

सम्पूर्णम्
sampūrṇam

अथ तन्त्रोक्तं रात्रिसूक्तम्
Atha Tantroktaṃ Rātrisūktam

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ।।१।।
Oṃ viśveśvarīṃ jagaddhātrīṃ sthitisaṃhārakāriṇīm
nidrāṃ bhagavatīṃ viṣṇoratulāṃ tejasaḥ prabhuḥ

ब्रह्मोवाच
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ।।२।।
brahmovāca
tvaṃ svāhā tvaṃ svadhā tvaṃ hi vaṣaṭkāraḥ svarātmikā
sudhā tvamakṣare nitye tridhā mātrātmikā sthitā

अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ।
त्वमेव संध्या सावित्री त्वं देवि जननी परा ।।३।।
ardhamātrāsthitā nityā yānuccāryā viśeṣataḥ
tvameva saṃdhyā sāvitrī tvaṃ devi jananī parā

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ।।४।।
tvayaitaddhāryate viśvaṃ tvayaitatsṛjyate jagat
tvayaitatpālyate devi tvamatsyante ca sarvadā

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ।।५।।
visṛṣṭau sṛṣṭirūpā tvaṃ sthitirūpā ca pālane
tathā saṃhṛtirūpānte jagato'sya jaganmaye

महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा च भवती महादेवी महासुरी ।।६।।
mahāvidyā mahāmāyā mahāmedhā mahāsmṛtiḥ
mahāmohā ca bhavatī mahādevī mahāsurī

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ।।७।।
prakṛtistvaṃcasarvasyaguṇatrayavibhāvinī
kālarātrirmahārātrirmoharātriścadāruṇā

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥८॥

tvaṃ śrīstvamīśvarī tvaṃ hrīstvaṃ buddhirbodhalakṣaṇā
lajjā puṣṭistathā tuṣṭistvaṃ śāntiḥ kṣāntireva ca

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥९॥

khaḍginī śūlinī ghorā gadinī cakriṇī tathā
śaṅkhinī cāpinī bāṇabhuśuṇḍīparighāyudhā

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥१०॥

saumyā saumyatarāśeṣasaumyebhyastvatisundarī
parāparāṇāṃ paramā tvameva parameśvarī

यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ॥११॥

yacca kiṃcitkvacidvastu sadasadvākhilātmike
tasya sarvasya yā śaktiḥ sā tvaṃ kiṃ stūyase tadā

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥१२॥

yayā tvayā jagatsraṣṭā jagatpātyatti yo jagat
so'pi nidrāvaśaṃ nītaḥ kastvāṃ stotumiheśvaraḥ

विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥१३॥

viṣṇuḥ śarīragrahaṇamahamīśāna eva ca
kāritāste yato'tastvāṃ kaḥ stotuṃ śaktimān bhavet

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥१४॥

sā tvamitthaṃ prabhāvaiḥ svairudārairdevi saṃstutā
mohayaitau durādharṣāvasurau madhukaiṭabhau

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥१५॥

prabodhaṃ ca jagatsvāmī nīyatāmacyuto laghu
bodhaśca kriyatāmasya hantumetau mahāsurau

इति रात्रिसूक्तम्
iti rātrisūktam

नवार्णविधिः
Navārṇavidhi
सप्तशतीन्यासः
Saptaśatīnyāsaḥ

नवार्णविधिः

Navārṇavidhi

The system of worship with the Navārṇa mantra (the nine lettered mantra)

Viniyogaḥ (Application), Dhyāna (Meditation) and Nyāsa (establishment) of Navārṇa mantra (the nine lettered mantra) should be performed in the following way -

विनियोगः -

श्रीगणपतिर्जयति। 'ॐअस्य श्रीनवार्णमन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः, गायत्र्युष्णिगनुष्टुभश्छन्दांसि, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, ऐं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम्, श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थे जपे विनियोगः ।'

Viniyogaḥ -

Śrīgaṇapatirjayati. Oṃ asya śrīnavārṇamantrasya brahmaviṣṇurudrā ṛṣayaḥ, gāyatryuṣṇiganuṣṭubhaśchandāṃsi, śrīmahākālīmahālakṣmīmahāsarasvatyo devatāḥ, aiṃ bījam, hrīṃ śaktiḥ, klīṃ kīlakam, śrīmahākālīmahālakṣmīmahāsarasvatīprītyarthe jape viniyogaḥ .

Viniyoga (Application) -

May the Lord be victorious. (Glory be to Gaṇeśa, the Lord of Wisdom.) Brahmā,Viṣṇu and Rudra are the Ṛṣiḥes (seers) of Śrīnavārṇamantra, Gāyatrī, Uṣṇik and Anuṣṭup are the metres, Śrīmahākālī, Mahālakṣmī and Mahāsarasvatī are the deities, Aiṃ is the seed, Hrīṃ is the energy, Klīṃ is the nail, this japa is dedicated to Śrīmahākālī, Mahālakṣmī and Mahāsarasvatī for their satisfaction.

Pour water after reading this.

Nyāsa -

Nyāsa means establishment. It means establishment of your own desired God within your desired body organ accompanied by chanting of mantras. This is done to relax the tired out body or any specific organ and to fill it with new energy.

ऋष्यादिन्यासः

(Establishment of the seers)

After reading each Nyāsa mantra touch head, mouth, face, heart, anal place, feet and navel portion with the fingers of right hand.

ब्रह्मविष्णुरुद्रऋषिभ्यो नमः, शिरसि।

brahmaviṣṇurudrarṣibhyo namaḥ, śirasi

I bow to Brahmā,Viṣṇu and Rudra ṛṣies (seers) — head

गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमः, मुखे ।

gāyatryuṣṇiganuṣṭupchandobhyo namaḥ, mukhe

I bow to Gāyatrī, Uṣṇik and Anuṣṭup — mouth

महाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः, हृदि ।

mahākālīmahālakṣmīmahāsarasvatīdevatābhyo namaḥ, hṛdi

I bow to Śrīmahākālī, Mahālakṣmī and Mahāsarasvatī — heart

ऐं बीजाय नमः, गुह्ये ।

aiṃ bījāya namaḥ, guhye

I bow to the seed Aiṃ (Aiṃ beej) — anus

ह्रीं शक्तये नमः, पादयोः ।

hrīṃ śaktaye namaḥ, pādayoḥ

I bow to the energy Hrīṃ (Hrīṃ shakti) — feet

क्लीं कीलकाय नमः, नाभौ ।

klīṃ kīlakāya namaḥ, nābhau

I bow to the nail Klīṃ (Klīṃ-keelak) — navel

Purify both of your hands with this Navārṇa mantra - aiṃ hrīṃ klīṃ cāmuṇḍāyai viccai ('ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चै ') and then perform Karanyāsa -

Karanyāsaḥ (करन्यासः)

(Presence of divinity in the hands)

ॐ ऐं अङ्गुष्ठाभ्यां नमः

Oṃ aiṃ aṅguṣṭhābhyāṃ namaḥ

Oṃ I bow to Aiṃ in the thumb.

(Touch your both thumbs with the fore-fingers)

ॐ ह्रीं तर्जनीभ्यां नमः

Oṃ hrīṃ tarjanībhyāṃ namaḥ

Oṃ I bow to Hrīṃ in the fore-fingers.

(Touch fore-fingers with thumbs)

ॐ क्लीं मध्यमाभ्यां नमः

Oṃ klīṃ madhyamābhyāṃ namaḥ

Oṃ I bow to Klīṃ in the middle-finger.

(Touch both mid-fingers with thumbs)

ॐ चामुण्डायै अनामिकाभ्यां नमः

Oṃ cāmuṇḍāyai anāmikābhyāṃ namaḥ

Oṃ I bow to Cāmuṇḍā in the ring finger.

(Touch your ring-fingers with thumbs)

ॐ विच्चे कनिष्ठिकाभ्यां नमः

Oṃ vicce kaniṣṭhikābhyāṃ namaḥ
Oṃ I bow to Vicce in the little finger.
(Touch your small-fingers with thumbs)

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः

Oṃ aiṃ hrīṃ klīṃ cāmuṇḍāyai vicce karatalakarapṛṣṭhābhyāṃ namaḥ
Oṃ I bow to Aiṃ, Hrīṃ, Klīṃ, chamundaye, viche in the palm and dorsal.
(Touch palms and in the reverse dorsal)

Hṛdayādinyāsaḥ (हृदयादिन्यासः)

(Presence of divine mother in the heart region)

Read the following mantras and touch heart etc. with the fingers of the right hand -

ॐ ऐं हृदयाय नमः

Oṃ aiṃ hṛdayāya namaḥ
I bow Aiṃ in the heart.

ॐ ह्रीं शिरसे स्वाहा

Oṃ hrīṃ śirase svāhā
Oṃ I bow to Hrīṃ on the top of the head.

ॐ क्लीं शिखायै वषट्

Oṃ klīṃ śikhāyai vaṣaṭ
Oṃ I bow to Klīṃ in the tuft.

ॐ चामुण्डायै कवचाय हुम्

Oṃ cāmuṇḍāyai kavacāya hum
Oṃ I bow to Cāmuṇḍā crossing both arms.
(Touch the left shoulder with right fingers and right shoulder with left fingers.)

ॐ विच्चे नेत्रत्रयाय वौषट्

Oṃ vicce netratrayāya vauṣaṭ
Oṃ I bow to Vicce on the three eyes.

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्

Oṃ aiṃ hrīṃ klīṃ cāmuṇḍāyai vicce astrāya phaṭ
Oṃ I bow to Aiṃ, Hrīṃ, Klīṃ, Cāmuṇḍāyai, Vicce in the Astra (missiles).

(Move right hand around head from left to right and clap left hand palm with mid finger and fore-finger.)

Akṣaranyāsaḥ (अक्षरन्यासः)
(Establishment of the letters)

Read the following mantras and touch turf etc. with the fingers of the right hand -

ॐ ऐं नमः, शिखायाम्।
Oṃ aiṃ namaḥ, śikhāyām
Oṃ I bow to Aiṃ — tuft

ॐ ह्रीं नमः, दक्षिणनेत्रे।
Oṃ hrīṃ namaḥ, dakṣiṇanetre
Oṃ I bow to Hrīṃ — right eye

ॐ क्लीं नमः, वामनेत्रे।
Oṃ klīṃ namaḥ, vāmanetre
Oṃ I bow to Klīṃ — left eye

ॐ चां नमः, दक्षिणकर्णे।
Oṃ cāṃ namaḥ, dakṣiṇakarṇe
Oṃ I bow to Cāṃ — right ear

ॐ मुं नमः, वामकर्णे।
Oṃ muṃ namaḥ, vāmakarṇe
Oṃ I bow to Muṃ — left ear

ॐ डां नमः, दक्षिणनासापुटे।
Oṃ ḍāṃ namaḥ, dakṣiṇanāsāpuṭe
Oṃ I bow to Ḍāṃ — right nostril

ॐ यैं नमः, वामनासापुटे।
Oṃ yaiṃ namaḥ, vāmanāsāpuṭe
